पाशकभेदे “कृताये त्रेतादयस्तेऽन्तर्भवन्ति” अयशब्दे ३३५ पृ० दर्शिते आनन्दगिरिः

**कृतार्थ** त्रि० कृतः अर्थः प्रयोजनं येन । कृतकार्य्ये । “शरदः कृतार्थताम्” किरा० “कृतः कृतार्थोऽस्मि निवर्हिताङ्हसा” माघः

**कृतालय** त्रि० कृत आलयोयेन । १कृतवासे “यत्र ते दयिता भार्य्या तनयाश्च कृतालयाः” रामा० । २भेके पुंस्त्री० त्रिका० स्त्रियां योपधत्वात् टाप् । [कर्म्मयुक्ते शब्दचि०।

**कृतावदान** त्रि० कृतमवदानं ख्यातकर्म्म येन । विख्यात

**कृतावसक्थिक** त्रि० कृताऽवसक्थिका येन । वस्त्रादिना जानुजङ्घापृष्ठबन्धयुक्ते “प्रौढ़पादोन कुर्व्वीत स्वाध्यायपितृतर्पणम् । आसनारूढपादस्तु जानुनोर्जङ्घयोस्तथा । कृतावसक्थिको यस्तु प्रौढपादः सउच्यते” आ०त०कात्या० “कृतावसक्थिकः कृतपृष्ठजानुजङ्घाबन्धः” आ० त० रघु०

**कृतास्त्र** त्रि० कृतं शिक्षितमस्त्रं येन । शिक्षितास्त्रे । “येषां योद्धा सव्यसाची कृतास्त्रः” भा० व० ४अ०

**कृति** स्त्री कृ—क्तिन् । १पुरुषप्रयत्ने, २कर्त्तृव्यापारे, “वृथा जातिस्तदायुष्मन् ! कृतिर्यत्र न विद्यते” भा०व०१२४८३श्लो० ३विंशत्यक्षरपादके छन्दोभेदे “कृतिः प्रकृतिराकृतिः” वृ०र०। ३क्रियायाम् मेदि० “श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदियादियम्” नैष० ४नृपभेदे पु० “सप्ताश्वमेधानाहृत्य राजसूयं च पार्थिवः । कृतिर्नामाऽभ्यवत् स्वर्गादस्तत्यवचनात् सकृत्” मार्क० पु० । स च जनकवंश्यः “बहुलाश्वोधृतेस्तस्य कृतिरस्य महाबलः” भाग०९।१३।१६ मैथिलवंश्यस्त्रोक्तौ । कृ बधे—क्तिन् । ५हिंसायां मेदि० ६विंशतिसंख्यायाम् कृतिकरः । कृत—बा० करणे इक् । ७कर्त्तन्यां स्त्री “हन्तेषु खादिषु कृतिषु संदवे” ऋ० १।१६४।२ “कृतिः कर्त्तनी” भा०

**कृतिकर** पु० कृतिसंख्यातुल्या विंशतिसंख्याः करा यस्य । रावणे शब्दमा० । तस्य विंशतिहस्तत्वात् तथात्वं कृति हस्तादयोऽप्यत्र पु०

**कृतिन्** त्रि० कृतमनेन कृत—इष्टा० इनि १कृतक्रिये कर्त्तरि अमरः, २पुण्यवति शब्दमा० “कृती श्रुती वृद्धमतेषु धीमान्” भट्टिः “न खल्वनिर्जित्य रघुं कृती भवान्” रघुः । “तवैव नामास्त्रगतिः कृती त्वम्” “यस्य चेतसि वर्त्तेथाः स तावत् कृतिनां वरः” कुमा० “कान्तवक्त्रसदृशाकृतिं कृती” माघः “कृतिः कृतिमुदे” कृतिशब्दे नैष०

**कृतिरात** पु० नृपभेदे “बहुलाश्वो धृतेस्तस्य कृतिरातो महाबलः” भाग० ९।१३।१७ पाठान्तरम् [थ्यर्चनकृते” या०

**कृते** अव्य० कृ—क्विप् नि० एदन्तत्वम् । निमित्तार्थे “देवाति-

**कृतेयुक** पु० पौरवे नृपभेदे । “ऋतेयुस्तस्य कक्षेयुः स्थण्डिलेयुः कृतेयुकः” भाग०९।२०३। रौद्राश्वस्य घृताच्यामप्सर स्युत्पन्नदशपुत्रोक्तौ

**कृतोदक** त्रि० कृतमुदकमुदककार्य्यं स्नानतर्पणादि येन । कृतस्नानादौ । “एवं कृतोदका भार्य्याः प्रवेक्ष्यन्ति गजाह्वयम्” भा० स्त्र० ७८ अ०

**कृतौजस्** पु० १कृतवीर्य्यभ्रातरि । कृतवीर्य्यशब्दे विवृतिः । कृतमोजोयेन । २कृततेजस्के कृतपराक्रमे त्रि०।

**कृत्त** त्रि० कृत+क्त । १छिन्ने, २वेष्टिते च हेम०

**कृत्ति** स्त्री कृत्यते कृत—कर्म्मणि—क्तिन् । १मृगादिचर्म्मणि कृत्तिवासाः । २त्वचि भूर्ज्जपत्ते ४कृत्तिकानक्षत्रे च मेदि० ५गृहे निरु०

**कृत्तिका** स्त्री कृन्तति उग्रत्वात् कृत—तिकन् किच्च । अश्विन्यादिषु तृतीये नक्षत्रे तस्याः क्षुरतुल्याकारत्वं घटता रात्मकत्वञ्च अश्लेषाशब्दे ४९७पृ० दर्शितम् अन्ये तु शकटाकारत्वमाहुः । सा च २६० अंशात्मके राशिचक्रे २६।४० अंशकलोत्तरम् १३।२० अंशकलात्मिका मेषवृषोभयराशिघटिका । तथा च तस्या आद्यचरणः मेषराशिघटकः अन्त्यचरणत्रयं वृषराशिघटकम् । अश्विन्यादयश्च सप्तविंशतिः दक्षसुता चन्द्रपत्न्यः । तत्र भरणी कृत्तिकाद्याः २।३।६।९।१०।१२।१६।२१।२६ संख्यकाः सपत्नीं रोहिणीं प्रति चन्द्रस्यातिशयानुरागदर्शनेन चन्द्रस्य भर्त्सनां कृतवत्यः । ततः चन्द्रेण ताः प्रति गमनाप्रशस्ततादिशापदानं कालिकापु० २० अध्याये उक्तं तच्च कालिकापुराणशब्दे २०१४पृ० दृश्यम् । दक्षसुतानां च चेतनत्वात् कृत्तिकाभिः षड्भिः कार्त्तिकेयस्य पोषणं कृतं कार्त्तिकेयशब्दे विवृतिः । तस्या अग्निरधिष्ठातृ देवः सा च मिश्रगणान्तर्गता “मिश्रोऽग्निः सविशाखभः, शुभकराः सर्व्वे स्वकृत्ये गणाः” ज्यो०त० । कृत्तिकानक्षत्रयुक्ता पौर्णमासी अण् ङीप्, कार्त्तिकी साश्विन् मासे पुनरण् । कार्त्तिक कार्तिक्या युक्ते चान्द्रे मासभेदे पु०

**कृत्तिकाञ्जि** पु० कृत्तिका शकटाकारा अञ्जिस्तिलकादि चिह्नमस्य । अश्वमेधीये शकटाकारतिलकचिह्नयुक्ते अश्वभेदे “विरूप एषोऽश्वः” इत्युपक्रमे “कृत्तिकाञ्जिः पुरस्तात्” शत० ब्रा० ।१२।४ “२कृत्तिका शकटाकारा अञ्जिर्यस्य” भा०